# वृक्षाः सत्पुरुषाः इव

0672CH16

पर्यावरणसंरक्षणस्य विषये एका प्रदर्शनी विद्यालये आयोजिता अस्ति। छात्राः तां प्रदर्शनीं पश्यन्ति। शिक्षकेण सह संलापं च कुर्वन्ति।




**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥**



**पदच्छेदः** – छायाम् अन्यस्य कुर्वन्ति तिष्ठन्ति स्वयम् आतपे फलानि अपि परार्थाय वृक्षाः सत्पुरुषाः इव।

**अन्वयः** – (वृक्षाः) स्वयम् आतपे तिष्ठन्ति (किन्तु) अन्यस्य छायां कुर्वन्ति, फलानि अपि परार्थाय (यच्छन्ति) (अतः) वृक्षाः सत्पुरुषाः इव (सन्ति)।

**भावार्थः** – वृक्षाः स्वयं सूर्यस्य आतपे तिष्ठन्ति किन्तु अन्येषां प्राणिनां कृते छायां कुर्वन्ति, फलानि अपि स्वयं न खादन्ति अपि तु अन्येभ्यः एव यच्छन्ति। अतः ते सत्पुरुषाः इव सन्ति। यतः ये सज्जनाः भवन्ति, ते स्वयं कष्टानि सहित्वा अपि अन्येषां हितं कुर्वन्ति।



**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः॥**

**पदच्छेदः** – दशकूपसमा वापी दशवापीसमः ह्रदः दशह्रदसमः पुत्रः दशपुत्रसमः द्रुमः।

**अन्वयः** – दशकूपसमा वापी (अस्ति), दशवापीसमः ह्रदः (अस्ति), दशह्रदसमः पुत्रः (अस्ति), दशपुत्रसमः द्रुमः (अस्ति)।

**भावार्थः** – दशकूपैः समाना एका वापी भवति। एवम् एव दशवापीसमानः एक ह्रदः भवति। दशह्रदैः समानः एकः/एका पुत्रः/पुत्री भवति। तथैव दशसन्तानैः समानः एकः वृक्षः मूल्यवान् भवति। अर्थात् एकः वृक्षः सर्वाधिकः उपकारकः भवति। अतः सर्वे वृक्षारोपणं कुर्वन्तु।



Reprint 2025-26

**अहो एषां वरं जन्म सर्वप्राण्युपजीवनम्।**
**सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः॥**




**पदच्छेदः** – अहो! एषाम् वरम् जन्म सर्वप्राणि-उपजीवनम्
सुजनस्य इव येषाम् वै विमुखाः यान्ति न अर्थिनः।

**अन्वयः** – अहो! एषां सर्वप्राण्युपजीवनं जन्म वरम् (अस्ति)।
सुजनस्य इव येषाम् अर्थिनः विमुखाः न यान्ति।

**भावार्थः** – श्रीकृष्णः युधिष्ठिरं वदति - हे युधिष्ठिर! अहो! एतेषां वृक्षाणां जन्म श्रेष्ठम् अस्ति, यतः एतेषां जन्म सर्वेषां जीवानाम् उपकाराय भवति। यथा सज्जनेभ्यः जनानां निराशा न भवति तथैव वृक्षाणां समीपे आगत्य अर्थिनां जनानां निराशा न भवति। तेषाम् आशानुरूपं वृक्षाः तेभ्यः फलानि पुष्पाणि छायां च यच्छन्ति।

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥**



**पदच्छेदः** – परोपकाराय फलन्ति वृक्षाः परोपकाराय
वहन्ति नद्यः परोपकाराय दुहन्ति गावः
परोपकारार्थम् इदम् शरीरम्।


**अन्वयः** – वृक्षाः परोपकाराय फलन्ति, नद्यः परोपकाराय वहन्ति, गावः परोपकाराय दुहन्ति, परोपकारार्थम् (एव) इदं शरीरम् (अस्ति)।

**भावार्थः** – वृक्षस्य फलानि अन्ये खादन्ति, न तु वृक्षः स्वयं खादति। नदीनां जलस्य उपयोगम् अपि अन्ये एव प्राणिनः कुर्वन्ति। गावः अपि अन्येषां कृते एव दुग्धं यच्छन्ति। एवमेव अस्माकं जीवनम् अपि अन्येषाम् उपकाराय भवतु।



Reprint 2025-26

**पुष्प-पत्र-फलच्छाया-मूल-वल्कल-दारुभिः।**
**धन्या महीरुहा येषां विमुखा यान्ति नार्थिनः॥**




**पदच्छेदः** – पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभिः धन्याः महीरुहाः येषाम् विमुखाः यान्ति न अर्थिनः।

**अन्वयः** – येषां पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभिः अर्थिनः विमुखाः न यान्ति (ते) महीरुहाः धन्याः (सन्ति)।

**भावार्थः** – प्राणिनः वृक्षात् पुष्पाणि, पत्राणि, फलानि, छायां, मूलानि, वल्कलानि काष्ठानि च प्राप्नुवन्ति। अर्थात् वृक्षाणां पार्श्वे यत् किमपि अस्ति तत् सर्वम् अपि प्राणिनां कृते एव अस्ति। वृक्षाः कदापि याचकान् निराशान् न कुर्वन्ति। अतः वृक्षाः धन्याः सन्ति।

**पिबन्ति नद्यः स्वयमेव नाम्भः**
**स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः**
**परोपकाराय सतां विभूतयः॥**



**पदच्छेदः** – पिबन्ति नद्यः स्वयम् एव न अम्भः, स्वयम् न खादन्ति फलानि वृक्षाः। न अदन्ति सस्यम् खलु वारिवाहाः, परोपकाराय सताम् विभूतयः।

**अन्वयः** – नद्यः अम्भः स्वयम् एव न पिबन्ति। वृक्षाः अपि फलानि स्वयं न खादन्ति। वारिवाहाः (अपि) सस्यं न अदन्ति खलु। (यतः) सतां विभूतयः परोपकाराय (भवन्ति)।

**भावार्थः** – नद्यः स्वीयं जलं स्वयं न पिबन्ति अपितु अन्येषाम् उपयोगाय यच्छन्ति। एवम् एव वृक्षाः अपि फलानि स्वयं न खादन्ति। मेघाः अपि जलं वर्षन्ति, किन्तु वृष्ट्या उत्पन्नं सस्यं स्वयं न खादन्ति। अनेन प्रकारेण सज्जनानां सम्पदः अपि परोपकाराय भवन्ति।

© NCERT not to be republished



Reprint 2025-26

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| आतपे | सूर्यतापे | धूप में | In the sunlight | |
| परार्थाय | अन्येषाम् उपकाराय | दूसरों के उपकार के लिए | For the sake of others | |
| सत्पुरुषाः | सज्जनाः | सज्जन लोग | Noble men | |
| वापी | दीर्घिका | बावड़ी | Stepwell | |
| ह्रदः | सरोवरः | तालाब / झील | Pond / Lake | |
| द्रुमः | वृक्षः | पेड़ | Tree | |
| वरम् | श्रेष्ठम् | श्रेष्ठ | Best | |
| अर्थिनः | प्राप्तुम् इच्छुकाः | प्राप्त करने के इच्छुक | Wishing to receive | |
| वहन्ति | प्रवहन्ति | बहती है | Flows | |
| वल्कलम् | वृक्षस्य त्वक् | पेड़ की छाल | Bark of tree | |
| दारुभिः | काष्ठैः | लकड़ियों से | By Wood | |
| महीरुहाः | वृक्षाः | पेड़ | Trees | |
| अम्भः | जलम् | पानी | Water | |
| वारिवाहाः | मेघाः | बादल | Clouds | |
| विभूतयः | समृद्धयः | समृद्धियाँ | Prosperity | |



## वयम् अभ्यासं कुर्मः

१. **पाठे लिखितानि सुभाषितानि सस्वरं पठन्तु, अवगच्छन्तु, लिखन्तु स्मरन्तु च।**

२. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) वृक्षाः स्वयं कुत्र तिष्ठन्ति? – ..............................

(ख) परोपकाराय काः वहन्ति? – ..............................

(ग) दशवापीसमः कः भवति? – ..............................

© NCERT not to be republished



Reprint 2025-26

(घ) सत्पुरुषाः इव के सन्ति? – ..............................

(ङ) अर्थिनः केभ्यः विमुखाः न यान्ति? – ..............................

(च) वृक्षाः स्वयं कानि न खादन्ति? – ..............................

३. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—**

(क) नद्यः किं न पिबन्ति?

..............................................................................

(ख) वृक्षाः अस्मभ्यं किं किं यच्छन्ति?

..............................................................................



(ग) इदं शरीरं किमर्थम् अस्ति?

..............................................................................

(घ) दशपुत्रसमः कः भवति?

..............................................................................

(ङ) केषां विभूतयः परोपकाराय भवन्ति?

..............................................................................

(च) अन्यस्य छायां के कुर्वन्ति?

..............................................................................

© NCERT not to be republished

४. **पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयन्तु—**

तिष्ठन्ति सुजनस्येव विभूतयः वृक्षाः फलानि दशपुत्रसमः परोपकारार्थम्

**यथा** – छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।

(क) फलान्यपि परार्थाय .............................. सत्पुरुषा इव।

(ख) दशह्रदसमः पुत्रः .............................. द्रुमः।

(ग) .............................. येषां वै विमुखा यान्ति नार्थिनः।

(घ) .............................. इदं शरीरम्।

(ङ) स्वयं न खादन्ति .............................. वृक्षाः।

(च) परोपकाराय सतां ..............................।





Reprint 2025-26

**५.** **उदाहरणानुसारम् अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां विभक्तिं निर्दिशन्तु—**

| | | |
|---|---|---|
| (क) | वृक्षाः अन्यस्य कृते **छायां** कुर्वन्ति। | द्वितीया विभक्तिः |
| (ख) | वृक्षाः परार्थाय **फलानि** यच्छन्ति। | ............................ |
| (ग) | वृक्षाः **सत्पुरुषाः** इव सन्ति। | ............................ |
| (घ) | **द्रुमः** दशसन्तानसमः भवति। | ............................ |
| (ङ) | वृक्षः **प्राणिभ्यः** काष्ठानि यच्छति। | ............................ |
| (च) | **नद्यः** जलं स्वयमेव न पिबन्ति। | ............................ |
| (छ) | सज्जनानां **सङ्गतिं** करोतु। | ............................ |

**६.** **अधोलिखितानां पदानां द्विवचने बहुवचने च रूपाणि लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वृक्षः | वृक्षौ | वृक्षाः |
| (ख) | मेघः | ............................ | ............................ |
| (ग) | ह्रदः | ............................ | ............................ |
| (घ) | सत्पुरुषः | ............................ | ............................ |
| (ङ) | छाया | ............................ | ............................ |
| (च) | वापी | ............................ | ............................ |
| (छ) | नदी | ............................ | ............................ |
| (ज) | शरीरम् | ............................ | ............................ |
| (झ) | पुष्पम् | ............................ | ............................ |

**७.** **अधोलिखितानां पदानां परस्परं समुचितं मेलनं कृत्वा 'कः किं ददाति' इति लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वृक्षः | दुग्धं | वृक्षः शुद्धं वायुं ददाति। |
| (ख) | गौः | प्रकाशं | ........................................ |
| (ग) | सूर्यः | विद्यां | ........................................ |
| (घ) | नदी | शुद्धं वायुं | ........................................ |
| (ङ) | अग्निः | जलम् | ........................................ |
| (च) | शिक्षकः | तापं | ........................................ |

© NCERT not to be republished



Reprint 2025-26

८. अधोलिखितानां क्रियापदानां लट्लकारे प्रथमपुरुषस्य रूपाणि लिखन्तु—

| | | | | |
|---|---|---|---|---|
| कुर्वन्ति | – | करोति | कुरुतः | कुर्वन्ति |
| तिष्ठन्ति | – | .................... | .................... | .................... |
| फलन्ति | – | .................... | .................... | .................... |
| यान्ति | – | .................... | .................... | .................... |
| पिबन्ति | – | .................... | .................... | .................... |
| खादन्ति | – | .................... | .................... | .................... |

## योग्यताविस्तरः

अधोलिखितां प्रहेलिकां पठित्वा उत्तरं वदन्तु—



वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः॥



© NCERT not to be republished

## परियोजनाकार्यम्

१. विद्यालयं गृहं वा परितः विद्यमानानां पञ्च-पादपानां (वृक्षाणां) संरक्षणं कुर्वन्तु।
२. अन्तर्जालस्य साहाय्येन परोपकारविषये दश-सुभाषितानां संग्रहणं कुर्वन्तु।



Reprint 2025-26

परिशिष्टम्

# आगच्छन्तु! संस्कृतेन संभाषणं कुर्मः

0672CH17

| | | |
|---|---|---|
| भवतः नाम किम्? | – | मम नाम राजेशः। |
| भवतः गृहं कुत्र अस्ति? | – | मम गृहं सञ्जयनगरे अस्ति। |
| भवान् किं करोति? | – | अहं कार्यं करोमि। |
| भवती किं लिखति? | – | अहं श्लोकं लिखामि। |
| सः कदा आगच्छति? | – | सः दशवादने आगच्छति। |
| कक्षायां कति छात्राः सन्ति? | – | कक्षायां त्रिंशत् छात्राः सन्ति। |
| रविः कुतः आगच्छति? | – | रविः ग्रन्थालयतः आगच्छति। |
| सः किमर्थं योगासनं करोति? | – | सः आरोग्यार्थं योगासनं करोति। |
| एतत् कस्य पुस्तकम्? | – | एतत् राजेशस्य पुस्तकम्। |
| भवत्याः आरोग्यं कथम् अस्ति? | – | मम आरोग्यं सम्यक् अस्ति। |
| नमस्ते। भवान् कथम् अस्ति? | – | नमस्ते। अहं कुशली अस्मि। |
| शारदे! भवती कथम् अस्ति? | – | आम्, अहमपि कुशलिनी अस्मि। |
| अद्य कः वासरः? | – | अद्य बुधवासरः। |
| इदानीं कः समयः? | – | इदानीं एकादशवादनम्। |
| भवती अद्य किं खादितवती? | – | अहम् अद्य दोसां खादितवती। |
| भवान् किं खादितवान्? | – | अहम् अद्य फलानि खादितवान्। |

| | |
|---|---|
| बालकः / बालिका / सः / सा / वाहनं / रविः / गीता | – गच्छति। |
| त्वं | – गच्छसि। |
| अहं | – गच्छामि। |

'करोति' इति क्रियापदम् उपयुज्य बहूनि वाक्यानि कर्तुं शक्नुमः।

यथा – बालकः पूजां करोति। योगासनं करोति। कार्यं करोति। पूजां करोति। स्नानं करोति।

'इच्छति' इति क्रियापदम् उपयुज्य बहूनि वाक्यानि कर्तुं शक्नुमः।

यथा – राधा जलम् इच्छति। फलम् इच्छति। भोजनम् इच्छति। गीतम् इच्छति।

मुख्यानि कतिचन क्रियापदानि – पठति, लिखति, खादति, पिबति, गच्छति, हसति, क्रीडति, मिलति, त्यजति, पृच्छति, नयति, भवति, अस्ति, जानाति, ददाति, शृणोति, प्रक्षालयति, मार्जयति, पश्यति, स्थापयति, स्मरति, उत्तिष्ठति, उपविशति॥



© NCERT not to be republished

Reprint 2025-26